# Shri Durga Panjara Stotram

# શ્રીદુર્ગા પઞ્જરસ્તોત્રમ્

## Document Information

Text title : durgApanjarastotram

File name : durgApanjarastotram.itx

Category : devii, devI, durga

Location : doc_devii

Transliterated by : Manali Shirke Rokade

Proofread by : Manali Shirke Rokade

Description/comments : mArkaNDeyapurANe devImahAtmye, rudrayAmale

Latest update : September 24, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 25, 2020

*sanskritdocuments.org*

# શ્રીદુર્ગા પઞ્જરસ્તોત્રમ્

વિનિયોગઃ-
ॐ અસ્ય શ્રીદુર્ગા પઞ્જરસ્તોત્રસ્ય સૂર્ય ઋષિઃ, ત્રિષ્ટુપ્છન્દઃ,
છાયા દેવતા, શ્રીદુર્ગા પઞ્જરસ્તોત્ર પાઠે વિનિયોગઃ ।
ધ્યાનમ્ ।
ॐ હેમ પ્રખ્યામિન્દુ ખણ્ડાત્તમૌલિં શઙ્ખાભીષ્ટા ભીતિ હસ્તાં ત્રિનેત્રામ્ ।
હેમાબ્જસ્થાં પીન વસ્ત્રાં પ્રસન્નાં દેવીં દુર્ગાં દિવ્યરૂપાં નમામિ ।
અપરાધ શતં કૃત્વા જગદમ્બેતિ ચોચ્ચરેત્ ।
યાં ગતિં સમવાપ્નોતિ નતાં બ્રહ્માદયઃ સુરાઃ ।
સાપરાધોઽસ્મિ શરણં પ્રાપ્તસ્ત્વાં જગદમ્બિકે ॥ ૧॥

માર્કણ્ડેય ઉવાચ -
દુર્ગે દુર્ગપ્રદેશેષુ દુર્વારરિપુમર્દિની ।
મર્દયિત્રી રિપુશ્રીણાં રક્ષાં કુરુ નમોઽસ્તુતે ॥ ૧॥

પથિ દેવાલયે દુર્ગે અરણ્યે પર્વતે જલે ।
સર્વત્રોઽપગતે દુર્ગે દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૨॥

દુઃસ્વપ્ને દર્શને ઘોરે ઘોરે નિષ્પન્ન બન્ધને ।
મહોત્પાતે ચ નરકે દુર્ગેરક્ષ નમોઽસ્તુતે ॥ ૩॥

વ્યાઘ્રોરગ વરાહાનિ નિર્હાદિજન સઙ્કટે ।
બ્રહ્મા વિષ્ણુ સ્તુતે દુર્ગે દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૪॥

ખેચરા માતરઃ સર્વં ભૂચરાશ્ચા તિરોહિતાઃ ।
યે ત્વાં સમાશ્રિતા સ્તાંસ્ત્વં દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૫॥

કંસાસુર પુરે ઘોરે કૃષ્ણ રક્ષણકારિણી ।
રક્ષ રક્ષ સદા દુર્ગે દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૬॥

અનિરુદ્ધસ્ય રુદ્ધસ્ય દુર્ગે બાણપુરે પુરા ।

વરદે ત્વં મહાઘોરે દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૭॥

દેવ દ્વારે નદી તીરે રાજદ્વારે ચ સઙ્કટે ।
પર્વતા રોહણે દુર્ગે દુર્ગે રક્ષ નમોઽસ્તુતે ॥ ૮॥

દુર્ગા પઞ્જર મેતત્તુ દુર્ગા સાર સમાહિતમ્ ।
પઠનસ્તારયેદ્ દુર્ગા નાત્ર કાર્યા વિચારણ ॥ ૯॥

રુદ્રબાલા મહાદેવી ક્ષમા ચ પરમેશ્વરી ।
અનન્તા વિજયા નિત્યા માતસ્ત્વમપરાજિતા ॥ ૧૦॥

ઇતિ શ્રી માર્કણ્ડેયપુરાણે દેવીમહાત્મ્યે રુદ્રયામલે દેવ્યાઃ પઞ્જરસ્તોત્રમ્ ।

Encoded and proofread by Manali Shirke Rokade

*Shri Durga Panjara Stotram*

pdf was typeset on September 25, 2020

Please send corrections to *sanskrit@cheerful.com*